# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| | | |
|---|---|---|
| **कक्षा- शास्त्री-२ (SEM-3)** | **प्रश्नपत्र-१** | **गुणाः - ७०** |
| **विषयः- अनिवार्यसंस्कृतम्** | **CF-233** | **समयः - ०३ तः ०६** |
| **दिनाङ्कः - २४/११/२०१६** | **सन्दर्भग्रन्थः - अभिज्ञानशाकुन्तलम् ( १-४ अङ्काः )** | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ द्वयोः ससन्दर्भं व्याख्या कार्या । ०८**

१. आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥

२. सरसिजमनुविद्धं शैवलेनापि रम्यं मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्ककेनापि तन्वी किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥

३. न खलु न खलु बाणः सन्निपात्योऽस्मिन् मृदुनि मृगशरीरे तूलराशाविवाग्निः ।
क्व बत हरिणकानां जीवितं चातिलोलं क्व च निशितनिपाता वज्रसाराः शरास्ते ॥

**प्र-२ महाकवेः कालिदासस्य जीवनपरिचयं कृतित्वञ्च संक्षेपेण समुपवर्ण्यताम् । ०८**

**अथवा**

**अभिज्ञानशाकुन्तलमभिलक्ष्य सप्रमाणम् उपमा कालिदासस्येति वाक्यं विविच्यताम् ।**

**प्र-३ टिप्पणीद्वयं लिखत । ०४**

१. अष्टमूर्तिवर्णनम् ।

२. भवितव्यानां द्वाराणि भवन्ति सर्वत्र ।

३. न प्रभातरलं ज्योतिरुदेति वसुधातलात् ।

४. प्रथमाङ्कस्य वर्णनम् ।

**प्र-४ पञ्चप्रश्नाः एकवाक्येन समाधेयाः । ०५**

१. अभिज्ञानशाकुन्तलनाटकस्य प्रारम्भिककथानकं कुतः सङ्गृहीतम्?

२. शकुन्तलायाः द्वयो सख्योर्नाम किम्?

३. कण्वः कुत्र गतः?

४. शकुन्तलायाः पितरौ कौ?

५. प्रथमाङ्के कति श्लोकाः?

६. विदूषकस्य नाम किम्?

७. शाकुन्तले कति अङ्काः?

**॥ द्वितीयान्वितिः ॥**

**प्र-५ द्वयोः ससन्दर्भं व्याख्या कार्या । ०८**

१. स्निग्धं वीक्षितमन्यतोऽसि नयने यत् प्रेरयन्त्या तया यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव ।
मा ना इत्युपरुद्धया यदपि तत्सासूपमुक्ता सखी सर्वं तत् किल मत्परायणमहो कामः स्वतां पश्यति ॥

२. शमप्रधानेषु तपोवनेषु गूढं हि दाहात्मकमस्ति तेजः ।
स्पर्शानुकुला इव सूर्यकान्तास्ते ह्यन्यतेजोऽभिभवाद्दहन्ति ॥

३. दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे तन्वी स्थिता कानिचिदेव पदानि गत्वा
आसीद् विवृत्तवदना च विमोचयन्ती शाखासु वल्कलमसक्तमपि द्रुमाणाम् ॥

**प्र-६ द्वितीयाङ्कस्य सारांशः लेख्यः ।** **०८**

**अथवा**

**काव्येषु नाटकं रम्यम् - इत्युक्तिः युक्तियुक्तं समीक्षणीया ।**

**प्र-७ एका टिप्पणी लेख्या ।** **०२**

१. कण्वऋषिः

२. प्रियंवदा

**प्र-८ द्वौ प्रश्नौ एकवाक्येन समाधेयौ ।** **०२**

१. कण्वाश्रमः कस्याः नद्याः तीरे वर्तते?

२. दुष्यन्तस्य सेनापतेः नाम किम्?

३. स्निग्धजनसंविभक्तं हि दुःखं सह्यवेदनं भवति - इत्युक्तिः के वदतः?

**॥ तृतीयान्वितिः ॥**

**प्र-९ द्वयोः ससन्दर्भं व्याख्या कार्या ।** **०८**

१. क्षौमं केनचिदिन्दुपाण्डुतरुणा माङ्गल्यविष्कृतं नैष्ठयूतश्चरणोपभोगसुलभो लाक्षारसः केनचित् ।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितैर्दत्तान्याभरणानि तत्किसलयोद्भदेप्रतिद्वन्द्विभिः ॥

२. शुश्रूषस्व गुरून्कुरु प्रियसखीवृत्तिं सपत्नीजने भर्तुर्विप्रकृतापि रोषमतया मा स्म प्रतीपं गमः ।
भूयिष्टं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी यान्तेवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥

३. पातुं न प्रथमं व्यवस्थति जलं युष्मास्वपीतेषु वा नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुकुमप्रसूतिसमये यस्या भवत्युत्सवः सेयं याति शकुन्तला प्रतिगृहं सर्वैरनुज्ञायताम् ॥

**प्र-१० कालिदासस्य प्रकृतिचित्रणं समुपवर्णनीयम् ।** **०८**

**अथवा**

**अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्य वैशिष्ट्यं प्रतिपाद्यताम् ।**

**प्र-११ टिप्पणीद्वयं लिखत ।** **०४**

१. विष्कम्भकः ।

२. गौतमी ।

३. पीड्यन्ते गृहिणः कथं न तनयाविश्लेषदुःखैर्नवैः ।

४. अर्थो हि कन्या परकीय एव ।

**प्र-१२ पञ्चप्रश्नाः एकेन वाक्येन समाधेयाः ।** **०५**

१. सुलभकोपो महर्षिः कः?

२. शार्ङ्गरवः कः?

३. शकुन्तलायाः पन्थाः कीदृशः भवतु?

४. ऋषिकुमारः कः?

५. शर्मिष्ठा कस्य बहुमता आसीत्?

६. मयूराः किमर्थं नृत्यं परित्यजन्ति?

७. कश्यपः कः?